योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०९०

< योगवासिष्ठः | प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)

शिखिध्वज उवाच ।

मणिसाधकविन्ध्येभबन्धनाद्यमरात्मज ।

सूचितं यत्कथाजालं पुनर्मे प्रकटीकुरु ।। १

चूडालोवाच ।

वाक्यार्थदृष्टेर्निष्पत्त्या हृद्गृहे चित्तभित्तिषु ।

शृणु स्वयं कथां चित्रां चित्रमुन्मीलयामि ते ।। २

योऽसौ शास्त्रार्थकुशलस्तत्त्वज्ञाने त्वपण्डितः ।

रत्नसंसाधकः प्रोक्तः स त्वमेव महीपते ।। ३

तज्ज्ञो भवसि शास्त्रेषु रविर्मेरुतटेष्विव ।

तत्त्वज्ञाने तु विश्रान्तो न त्वं दृषदिवाम्भसि ।। ४

विद्धि चिन्तामणिं साधो सर्वत्यागमकृत्रिमम् ।

तमन्तं सर्वदुःखानां त्वं साधयसि शुद्धधीः ।। ५

सर्वत्यागेन शुद्धेन सर्वमासाद्यतेऽनघ ।

सर्वत्यागो हि साम्राज्यं किं चिन्तामणितो भवेत् ।। ६

सिद्धः सर्वपरित्यागः साधो संसाध्यतस्तव ।

खर्वीकृतजगद्भूतिर्विद्यास्वात्मोदयस्तथा ।। ७

संत्यक्तं भवता राज्यं सदारधनबान्धवम् ।

ब्रह्मणेव जगत्सर्गव्यापारः स्वनिशागमे ।। ८

स्वदेशस्यातिदूरस्थमागतोऽसि ममाश्रमम् ।

भुवोऽन्तमिव विश्रान्त्यै वैनतेयः सकच्छपः ।। ९

केवलं सर्वसंत्यागे शेषिताहंमतिस्त्वया ।

मृष्टाखिलकलङ्केन स्वसत्तेवानिलेन खे ।। १०

मनोमात्रे हृदस्त्यक्ते जगदायाति पूर्णताम् ।

त्यागात्यागविकल्पैस्त्वं खमम्भोदैरिवावृतः ।। ११

नायं स परमानन्दः सर्वत्यागो महोदयः ।

कोऽप्युच्चैरन्य एवासौ चिरसाध्यो महानिति ।। १२

चिन्तयेति गते वृद्धिं संकल्पग्रहणे शनैः ।

वात्ययेव वनस्पन्दे त्यागः प्रोड्डीय ते गतः ।। १३

त्यागिता स्यात्कुतस्तस्य चिन्तामप्यावृणोति यः ।

पवनस्पन्दयुक्तस्य निःस्पन्दत्वं कुतस्तरोः ।। १४

चिन्तैव चित्तमित्याहुः संकल्पेतरनामकम् ।

तस्यामेव स्फुरन्त्यां तु चित्तं त्यक्तं कथं भवेत् ।। १५

चित्ते चिन्तागृहीते तु त्रिजगज्जालके क्षणात् ।

कथमासाद्यते साधो सर्वत्यागो निरञ्जनः ।। १५

संकल्पग्रहणेनान्तस्त्यागः प्रोड्डीय ते गतः ।

शब्दसंश्रवणेनाङ्ग यथा ग्रामविहंगमः ।। १७

निश्चिन्तत्वं परं सर्वं त्याग आदाय ते गतः ।

आमन्त्र्यापूजितो जन्तुः स दुःखं न करोति किम् ।।१८

सर्वत्यागमणावेवं गते कमललोचन ।

तपःकाचमणिर्दृष्टस्त्वया संकल्पचक्षुषा ।। १९

त्वया तस्मिंस्तपस्येव दुःखे दृष्टिभ्रमोदिते ।

ग्राह्यैकभावना बद्धा जलेन्दौ शशिनो यथा ।। २०

अवासनमनासक्त्या कृतानन्ता सवासना ।

आद्यन्तमध्यविषमा दुःखायैव तपःक्रिया ।। २१

अमितानन्दमुत्सृज्य सुसाध्यं यः प्रवर्तते ।

मिते वस्तुनि दुःसाध्ये स्वात्महा स शठः स्मृतः ।। २२

सर्वत्यागं समारभ्य न चैष साधितस्त्वया ।

तथा दुःखैकताज्ञानबद्धेन वनसद्मनि ।। २३

राज्यबन्धाद्विनिष्क्रम्य प्रसरदुःखपूरितात् ।

वनवासाभिधैः साधो बद्धोऽसि दृष्टबन्धनैः ।। २४

द्विगुणा एव ते चिन्ताः शीतवातातपादयः ।

बन्धनादधिकं मन्ये वनवासमजानताम् ।। २५

चिन्तामणिर्मया प्राप्त इत्यलं बुद्धवानसि ।

न लब्धवान्भवान्साधो स्फटिकस्यापि खण्डिकाम्२६

इत्येतदङ्ग मणियत्नकथासमानं

सम्यङ्मया प्रकथितं तव पद्मनेत्र ।

तद्बोध्यमेवममलं स्वयमेव बुद्ध्वा

यद्वेत्सि तत्परिणतिं नय चित्तकोशे ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० निर्वाण० पू० चू० चिन्तामणिसाधकवृत्तान्तविवरणं नाम नवतितमः सर्गः ।। ९० ।।